णिश, ध्यौते। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ध्यौते समाधौ। नेशति योगी। निनिशतुः। इति दुर्गादासः॥

णिष, उ सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) उ, नेषित्वा निष्ट्वा। इति दुर्गादासः॥

णिस, इ ङ ल चुम्बने। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं-सेट्।) ल ङ, निंस्ते। इ, निंस्यते। इति दुर्गादासः॥

णी, ञ प्रापणे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-द्विकं-अनिट्।) वोपदेवपाठो नादित्वेन प्रागवन्न इति णत्वार्थः। प्रणयति। एवं सर्व्वत्र। प्रापणमिह आन्तस्य रूपम्। तथा च। वृणाति लम्भयति च वेहत्यपि नयत्यन्ह। इति क्रियानिर्घण्टः॥ ञ, नयति नयते गां वनं गोपः प्रापयतीत्यर्थः। इति दुर्गादासः॥

णील, वर्णे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट्।) वर्ण इह कृष्णवर्णीभावस्तत्करणञ्च। नीलति पत्रं तमालस्य। नीलति वस्त्रं तन्त्रवायः। इति दुर्गादासः॥

णीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) नीवति लोकः स्थूलः स्यादित्यर्थः। इति दुर्गादासः॥

णु, ल स्तुतौ। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-सेट्।) ल, नौति। इति दुर्गादासः॥

णुद, ञ श औ प्रेरणे। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) ञ श, नुदति नुदते शरं योधः। औ, नोत्ता। इति दुर्गादासः॥

णू, शि स्तवने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ह्रस्वान्तोऽयमिति वररुचिः। शि, नुवति। अनुवीत्। इति दुर्गादासः॥

णेद, ऋ ञ सन्निधौ। कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-अकं-सकं च-सेट्।) सन्निधिः सन्निकर्षः। ऋ, अनिनेदत्। ञ, नेदति नेदते दयालुं दीनः। निनेदुः। इति दुर्गादासः॥

णेष, ऋ ङ व्रजे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ऋ, अनिनेषत्। ङ, नेषते निनेषे। व्रजो गतिः। इति दुर्गादासः॥ *॥ एते धातवः स्वभावतो दन्त्यनादयो वोपदेवेन मूर्द्धन्यणाद्याः॥

---

# त

त, तकारः। स व्यञ्जनषोड़शवर्णः। तवर्गप्रथमवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्यः।) अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (अस्योच्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासघोषाः बाह्यप्रयत्नाः। मातृकान्यासेऽस्य वामस्फिचि न्यासक्रिया स्यात्। वङ्गीयवर्णमालायां) तस्य लेखनप्रकारो यथा,—

"आदौ बिन्दुस्ततो मध्ये कुण्डलीत्वमवाप्य सा।
दक्षाद्वामगता नित्या ब्रह्मविष्णुशिवरूपिणी॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।
चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम्॥
सदा षोड़शवर्षीयां रक्ताम्बरधरां पराम्।
नानालङ्कारभूषां वा सर्व्वसिद्धिप्रदायिनीम्॥
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"तकारं चञ्चलापाङ्गि! स्वयं परमकुण्डली।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम्।
त्रिबिन्दुसहितं वर्णं पीतविद्युत्समप्रभम्॥"

तस्य ३२ द्वात्रिंशन्नामानि यथा,—
"तः पूतना हरिः शुद्धिः शक्ती शक्तिर्जटी ध्वजा।
वामस्फिक्वामकट्यौ च कामिनी मध्यकर्णकः॥
आषाढ़ी तण्डतुस्तश्च कामिका पृष्ठपुच्छकः।
रत्नकश्च श्यामसुखी वाराही मकरोऽरुणा॥
सुगतोऽर्द्धसुखा बुद्धजानुश्च क्रोड़पुच्छकः।
गन्धो विश्वामरुच्छत्रश्चानुराधा च सौरकः॥
जयन्तिपुलको भ्रान्तिरनङ्गमदनातुरा॥"
इति नानातन्त्रशास्त्रम्॥

तं, क्ली स्त्री, (त + भावे डः।) तरणम्। (तरति भवसागरमनेनेति। तॄ + करणे डः।) पुण्यम्। इति मेदिनी। ते, १॥

तः, पुं, (तर्द्दति तम्बति वा छिनत्ति क्षयाद्दिहरणेन जनानिति। तर्द्द तम्ब वा + डः।) चौरः। अमृतम्। पुच्छम्। क्रोड़ः। म्लेच्छः। इति मेदिनी। ते, १॥ गर्भः। शठः। इति शब्दरत्नावली॥ रत्नम्। सुगतः। योधः। गौरविवर्ज्जितपुच्छम्। क्रोष्टुपुच्छम्। इत्येकाक्षरकोषः॥

तक, सहने। हासे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-हासे अकं-सेट्) तकति। इति दुर्गादासः॥

तक, इ दौस्थ्ये। इति कविकल्पद्रुमः (भ्वां-परं-अकं-सेट्।) दौस्थ्यं दुःखेन जीवनम्। इ, तङ्क्यते दरिद्रेण दुःखेन जीयते इत्यर्थः। तङ्कति दीनः दुःखेन जीवति इत्यर्थः। इति दुर्गादासः॥

तकिलः, त्रि, (तक् + "मिथिलादयश्च।" उणां। १।५६। इति इलच् नलोपश्च।) धूर्त्तः। इत्युणादिकोषः॥

तकिला, स्त्री, (तकिल + टाप्।) औषधम्। इत्युणादिकोषः॥

तक्यः, त्रि, (तकं हासमर्हतीति। तक + यत्।) हास्यः। (तक सहने + "तकिशसि चयति जनिभ्यो यद्वाच्यः।" ६।४।६५। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या यत्।) सहनीयः॥

तक्रं, क्ली, (तनक्ति सङ्कोचयति दुग्धं पादाम्बुदधिरूपेण परिणमयतीत्यर्थः। "स्फायितञ्चीति।" उणां। २।१३। इति रक् न्यङ्क्वादित्वात् कुत्वं च।) पादाम्बुसंयुतदधि। इत्यमरः।२।९।५३॥ तत्पर्य्यायः। गोरसजम् २ घोलम् ३ कालसेयम् ४ विलोड़ितम् ५ दण्डाहतम् ६ अरिष्टम् ७ अम्लम् ८ उदश्वित् ९ मथितम् १० द्रवः ११। इति राजनिर्घण्टः॥ तत् पञ्चविधम्। तेषां भिन्नानि नामानि लक्षणानि च यथा,—

"ससरं निर्जलं घोलं मथितं त्वसरोदकम्।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम्॥
छच्छिका सरहीनं स्यादच्छा प्रचुरवारिका॥"

तेषां गुणाः।
"वातपित्तहरं घोलं मथितं कफपित्तनुत्।
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु॥
वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम्।
ग्रहण्यादिमतां पथ्यं भवेत् संग्राहि लाघवात्॥
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम्।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चापि कफापहम्॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः॥
उदश्वित् कफकृद्बल्यं श्रमघ्नं परमं मतम्।
छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी॥
वातनुत् कफकृत् सा तु दीपनी लवणान्विता॥"

अथोद्धृतघृतस्तोकोद्धृतघृतानुद्धृतघृतानां तक्राणां गुणाः।
"समुद्धृतं घृतं तक्रं पथ्यं लघु विशेषतः।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम्॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्॥" *॥

अथ दोषविशेषे व्याधिविशेषे च तक्रविशेषाः।
"वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्।
पित्ते स्वादुसितायुक्तं सव्योषमव्ययं कफे॥
हिङ्गुजीरयुतं घोलं सैन्धवेन सुसंयुतम्।
भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम्॥
सुरुच्यं पुष्टिदं बल्यं वस्तिशूलविनाशनम्।
मूत्रकृच्छ्रे तु सगुड़ं पाण्डुरोगे सचित्रकम्॥" *॥

अथामपक्वतक्रगुणाः।
"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च।
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते॥" *॥

अथ तक्रसेवननिमित्तानि।
"शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम्॥
तत्तु हन्ति गरच्छर्द्दिप्रसेकविषमज्वरान्।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान्॥
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः।
श्वित्रकोठघृतव्यापत्कुष्ठशोथतृषाकृमीन्॥"

अथातक्रविषयाः।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके॥" *॥

अथ गव्यादीनां तक्राणां विशिष्टगुणाः।
"यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत्॥"
इति भावप्रकाशः॥